स मुष्टिं पातयामास हृदये दैत्यपुङ्गव: ।।२० ।।
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ।

पदच्छेद

स: मुष्टिम् पातयामास हृदये दैत्यपुङ्गव: ।
देव्या: तम् च अपि सा देवी तलेन उरसि अताडयत् ।।२० ।।

अन्वित-पदार्थ

स: = उस, **दैत्यपुंगव:** = दानवप्रवर ने, **देव्या:** = भगवती के, **हृदये** = हृदय पर, **मुष्टिम्** = मुक्के का, **पातयामास** = प्रहार किया, **सा च** = उन, **देवी** = भगवती ने, **तम्** = उसको, **अपि** = भी, **उरसि** = छाती पर, **तलेन** = हथेली से सीधा, **अताडयत्** = वार किया ।।२० ।।

मन्त्र

तलप्रहाराभिहतो निपपात महीतले ।
स दैत्यराज: सहसा पुनरेव तथोत्थित: ।।२१ ।।

पदच्छेद

तल(स्य) प्रहार अभिहत: निपपात महीतले ।
स: दैत्यराज: सहसा पुन: एव तथा उत्थित: ।।२१ ।।

अन्वित-पदार्थ

स: = वह, **दैत्यराज:** = दैत्यराज, **तलस्य** = भगवती की हथेली के, **प्रहारेण** = सीधे प्रहार से, **अभिहत:** = घायल होकर, **महीतल** = धरती पर, **निपपात** = पुन: गिर पड़ा फिर, **सहसा** = तुरन्त, **तथा एव** = पूर्ववत्, **उत्थित:** = उठ खड़ा हुआ ।।२१ ।।

मन्त्र

उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थित: ।।२२ ।।
तत्रापि सा निराधारा युयुधे तेन चण्डिका ।।२३ ।।

पदच्छेद

उत्पत्य च प्र–गृह्य उच्चैः देवीम् गगनम् आ–स्थितः ।।२२ ।।
तत्र अपि सा निर्–आधारा युयुधे तेन चण्डिका ।।२३ ।।

अन्वित–पदार्थ

उत्पत्य च = और उठकर, **देवीम्** = भगवती को, **उच्चैः** = ऊपर से, **प्रगृह्य** = पकड़ कर, **गगनम्** = आकाश को, **आस्थितः** = आश्रय बना लिया, **निराधारा** = आधारहीन स्थिति में, **सा चण्डिका** = वह भगवती चण्डिका, **तत्रापि** = वहाँ भी, **तेन** = उसके साथ, **युयुधे** = युद्ध कर रही थीं ।।२२–२३ ।।

मन्त्र

नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ।
चक्रतुः प्रथमं युद्धंमुनिविस्मयकारकम् ।।२४ ।।

पदच्छेद

नि–युद्धम् खे तदा दैत्यः चण्डिका च परस्परम् ।
चक्रतुः प्रथमम् युद्धम् मुनि–वि–स्मय–कारकम् ।।२४ ।।

अन्वित–पदार्थ

तदा = उसी समय, **खे** = आकाश में, **दैत्यः** = शुम्भ राक्षस, **चण्डिका च** = तथा चण्डिका ने, **परस्परम्** = परस्पर, **मुनीनाम्** = मुनियों को, **विस्मयकारकम्** = आश्चर्यचकित करनेवाले, **प्रथमम्** = प्रथम बार, **नियुद्धम्** = शस्त्रविहीन करयुद्ध नामक, **युद्धम्** = युद्ध, **चक्रतुः** = किया ।।२४ ।।

मन्त्र

ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।
उत्पात्य भ्रामयामास चिक्षेप धरणीतले ।।२५ ।।

पदच्छेद

ततः नि–युद्धम् सु–चिरम् कृत्वा तेन अम्बिका सह ।
उत्–पात्य भ्रामयामास चिक्षेप धरणी–तले ।।२५ ।।

अन्वित–पदार्थ

ततः = इसके बाद,
अम्बिका = अम्बिका ने,
तेन सह = उसके साथ,
सुचिरम् = दीर्घ काल तक,
नियुद्धम् = नियुद्ध,
कृत्वा = करके अन्ततः,
उत्पात्य = उठाकर,
भ्रामयामास = घुमाया तथा,
धरणीतले = धरती पर,
चिक्षेप = पटक दिया ।।२५ ।।

मन्त्र

स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगतः ।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ।।२६ ।।

पदच्छेद

सः क्षिप्तः धरणीम् प्राप्य मुष्टिम् उद्यम्य वेगतः ।
अभि–अधावत दुष्टात्मा चण्डिकायाः नि–धन (स्य) इच्छया ।।२६ ।।

अन्वित–पदार्थ

सः दुष्टात्मा = वह दुष्ट राक्षस,
क्षिप्तः = पटके जाने पर,
धरणीम् = धरती पर,
प्राप्य = पहुँच कर,
मुष्टिम् = घूँसा,
उद्यम्य = उठाकर,
चण्डिकायाः = चण्डिका के,
निधनस्य = प्राण हरण की,
इच्छया = इच्छा से,
वेगतः = तीव्रता से,
अभ्यधावत = उनकी ओर दौड़ा ।।२६ ।।

मन्त्र

तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ।।२७ ।।

पदच्छेद

तम् आ–यान्तम् ततः देवी सर्व–दैत्य–जन–ईश्वरम् ।
जगत्याम् पातयामास भित्त्वा शूलेन वक्षसि ।।२७ ।।

अन्वित-पदार्थ

ततः = इसके पश्चात्,
देवी = भगवती ने,
तम् = उस,
सर्वेषाम् = सभी,
दैत्यजनानाम् = दैत्यों के,
ईश्वरम् = स्वामी शुम्भ को,
आयान्तम् = पास आते ही,
वक्षसि = छाती में,
शूलेन = शूल द्वारा,
भित्त्वा = भेदन करके,
जगत्याम् = धरती पर,
पातयामास = गिरा दिया ।।२७।।

मन्त्र

स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ।
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ।।२८।।

पदच्छेद

सः गत-असुः पपात उर्व्याम् देवी-शूल-अग्रेण वि-क्षतः ।
चालयन् सकलाम् पृथ्वीम् साब्धि-द्वीपाम् सपर्वताम् ।।२८।।

अन्वित-पदार्थ

देव्याः = भगवती के,
शूलाग्रेण = भाले से,
विक्षतः = विदीर्ण होकर,
साब्धिद्वीपाम् = समुद्रों, द्वीपों,
सपर्वताम् = पर्वतों सहित,
पृथ्वीम् = धरती को,
चालयन् = कम्पित करते हुए,
गतासुः = निष्प्राण,
सः = वह शुम्भ,
उर्व्याम् = धरती पर,
पपात = गिर गया ।।२८।।

मन्त्र

ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ।
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ।।२९।।

पदच्छेद

ततः प्रसन्नम् अ-खिलम् हते तस्मिन् दुरात्मनि ।
जगत् स्वास्थ्यम् अति-इव आप निर्मलम् च अभवत् नभः ।।२९।।

अन्वित-पदार्थ

तस्मिन् = उस,
दुरात्मनि = दुष्ट के,
नभः च = और आकाश,
निर्मलम् = निर्मल,

हते = मारे जाने पर,
जगत् = संसार,
अतीव = अत्यन्त,
स्वास्थ्यम् = स्वस्थता,
आप = प्राप्त कर चुका था,
अभवत् = हो गया था,
तत् = इसके पश्चात्,
अखिलम् = सम्पूर्ण जगत्,
प्रसन्नम् = प्रसादयुक्त हो गया था ।।२९।।

मन्त्र

उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ।।३०।।

पदच्छेद

उत्–पात–मेघाः स–उल्काः ये प्राग् आसन् ते शमम् ययुः ।
सरितः मार्ग–वाहिन्यः तथा आसन् तत्र पातिते ।।३०।।

अन्वित–पदार्थ

पतित = शुम्भ के मारे जाने पर,
ये = जो,
सोल्काः = उल्कापिण्डों के साथ,
उत्पातमेघाः = प्रलयकारी बादल,
प्राक् = युद्ध के पूर्व,
आसन् = छाये थे,
ते शमम् = वे शान्त,
ययुः = हो गए थे,
तथा = इसी प्रकार,
तत्र सरितः = वहाँ नदियाँ,
मार्गवाहिन्यः = उचित मार्ग पर बहने लगी,
आसन् = थीं ।।३०।।

मन्त्र

ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ।।३१।।

पदच्छेद

ततः देवगणाः सर्वे हर्ष निर्भर–मानसाः ।
बभूवुः नि–हते तस्मिन् गन्धर्वाः ललितम् जगुः ।।३१।।

अन्वित–पदार्थ

ततः = इसके बाद,
सर्वे = सभी,
देवगणाः = देवमण्डली,
तस्मिन् = उसके,
निहते = मारे जाने पर,
गन्धर्वाः = गन्धर्व लोग,

हर्षनिर्भरमानसाः = आनन्द विभोर,
बभूवुः = हो गईं,
ललितम् = सुमधुर,
जगुः = गान कर रहे थे ।।३१ ।।

मन्त्र

अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ।
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ।।३२ ।।

पदच्छेद

अवादयन् तथा–एव अन्ये ननृतुः च अप्सरः गणाः ।
ववुः पुण्याः तथा वाताः सु–प्रभः अभूत् दिवाकरः ।।३२ ।।

अन्वित–पदार्थ

तथैव = इसी प्रकार,
अन्ये = दूसरे गन्धर्व,
अवादयन् = वाद्यों को बजा रहे थे,
अप्सरोगणाः च = और अप्सराएँ,
ननृतुः = नाचने लगी थीं,
पुण्याः = अनुकूल,
वाता = वायु,
ववुः = बह रही थी,
तथा = इसी प्रकार,
दिवाकरः = सूर्य,
सुप्रभः = सुतेजस्वी,
अभूत् = हो चुके थे ।।३२ ।।

मन्त्र

जज्वलुश्चाग्नयःशान्ताःशान्ता दिग्जनितस्वनाः ।।३३ ।।

पदच्छेद

जज्वलुः च अग्नयः शान्ताः शान्ताः दिग्–जनित–स्वनाः ।।३३ ।।

अन्वित–पदार्थ

शान्ताः च = और बुझी हुई,
अग्नयः = आहवनीय आदि अग्नियाँ,
जज्वलुः = जल उठीं,
दिग्जनिताः = दिशाओं में प्रतिध्वनित होनेवाले,
स्वनाः = शब्द,
शान्ताः = शान्त हो गए थे ।।३३ ।।

।। इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शुम्भवधो नाम दशमोऽध्यायः ।।

।। एकादशोऽध्यायः ।।

विशेष

दधिमथी ध्यानम्

। । । । ऽ ऽ । । । ।(१२) ऽ ऽ ऽ ऽ । ऽ । ऽ ऽ ऽ (१८)

जयजय वार्या दधिमथि !, जन्माऽन्तामेलनं हृदुन्माथि[1] ।

ऽ ऽ । ऽ । । । ऽ(१२) ऽ ऽ ऽ ऽ । ऽ ऽ ऽ (१५)

आवाल<u>चित्र</u>तनुभा, <u>आर्या</u>नव्यास्तथाऽम्बाभा ।।१ ।।


अन्वयः

आवालचित्रतनुभा ! दधिमथि ! (त्वं) जय जय। (त्वं) हृदुन्माथि[1] जन्मान्तामेलनं वार्याः। तथा (त्वं) अम्बाभा। आर्यान् अव्याः।

देवीस्तवः लघुच्छन्दोऽलङ्कारदर्पणः श्लोक संख्या ।।१।।

आचार्य नित्यानन्द शास्त्री

देवीस्तव – च्छत्रबन्ध चित्रम्



१. पादान्त वर्ण विकल्प से गुरु होते हैं।

मन्त्र

ऋषिरुवाच ।।१ ।।

देव्या हते तत्र महासुरेन्द्रे सेन्द्राः
सुरा वह्निपुरोगमास्ताम् ।
कात्यायनीं तुष्टुवुरिष्टलाभाद्
विकाशिवक्त्राब्जविकाशिताशाः ।।२ ।।

पदच्छेद

ऋषिः उवाच ।।१ ।।

देव्या हते तत्र महा–असुर–इन्द्रे स–इन्द्राः
सुराः वह्नि–पुरः–गमाः ताम् ।
कात्यायनीम् तुष्टुवुः इष्ट (स्य) लाभाद्
विकाशि–वक्त्र–अब्ज–विकाशित–आशाः ।।२ ।।

अन्वित–पदार्थ

ऋषिः उवाच = ऋषि बोले ।।१ ।।
देव्या = भगवती द्वारा,
तत्र = उस महासमर में,
महताम् = बड़े बड़े,
असुराणाम् = राक्षसों के,
इन्द्रे = राजा शुम्भ–निशुम्भ के,
हत = मारे जाने पर,
इष्टस्य लाभाद् = इच्छित वस्तु की प्राप्ति के कारण,
विकाशिताशाः = सभी दिशाएँ जगमगानेवाले,
विकाशिवक्त्राब्जाः = चमकते हुए मुख कमलोंवाले,
वह्निपुरोगमाः = अग्नि के नेतृत्व में,
सेन्द्राः = इन्द्र सहित,
सुराः = देवगण,
ताम् = उन,
कात्यायनीम् = कात्यायनी की,
तुष्टुवुः = स्तुति करने लगे ।।२ ।।

मन्त्र

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ।।३ ।।

पदच्छेद

देवि प्रपन्न–आर्ति–हरे प्रसीद
प्रसीद मातः जगतः अखिलस्य।
प्र–सीद विश्व (स्य) ईश्वरि पाहि विश्वम्
त्वम् ईश्वरी देवि चरा–चरस्य ।।३ ।।

अन्वित–पदार्थ

देवि = हे देवि !,
प्रपन्नानाम् = शरणागतों के,
आर्तिहर = दुःखों का निवारण करनेवाली,
प्रसीद = आप प्रसन्न हों,
अखिलस्य जगतः = हे समस्त जगत् की,
मातः = माता,
प्रसीद = आप प्रसन्न हों,
विश्वम् = विश्व का,
पाहि = संरक्षण करें,
देवि त्वम् = हे अम्बे,
चराचरस्य ईश्वरी = आप जड़ चेतन की अधीश्वरी हैं ।।३ ।।

मन्त्र

आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि।
अपां स्वरूपस्थितया त्वयैत–
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ।।४ ।।

पदच्छेद

आधार भूता जगतः त्वम् एका
मही–स्व–रूपेण यतः स्थिता असि।
अपाम् स्व–रूप–स्थितया त्वया एतत्
आ–प्यायते कृत्स्नम् अ–लङ्घ्य–वीर्ये ।।४ ।।

अन्वित-पदार्थ

त्वम् = हे माता आप,
जगत: = इस जगत् की,
एका = एक मात्र,
आधारभूता = अधिकरण स्वरूपिणी हैं,
यत: = क्योंकि,
महीस्वरूपेण = आप ही धरती के रूप में,
स्थता असि = स्थित हैं,
अलङ्घ्यवीर्ये = हे अजिते,
अपाम् = जल,
स्वरूपस्थितया = स्वरूप में स्थित होने के कारण,
एतत् कृत्स्नम् = यह सब कुछ,
त्वया = आप के द्वारा,
आप्यायते = जलमग्न कर दिया जाता है ।।४ ।।

मन्त्र

त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया ।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ।।५ ।।

पदच्छेद

त्वम् वैष्णवी-शक्तिः अनन्त-वीर्या
विश्वस्य बीजम् परमा असि माया ।
सम्-मोहितम् देवि समस्तम् एतत्
त्वम् वै प्रसन्ना भुवि मुक्ति हेतुः ।।५ ।।

अन्वित-पदार्थ

त्वम् = आप,
अनन्तवीर्या = अनन्त बलशालिनी,
विश्वस्य बीजम् = विश्व का मूल,
वैष्णवीशक्तिः = भगवान् विष्णु की शक्ति,
परमा माया = परमा योगमाया,
एतत् समस्तम् = यह सारा जगत् आपके द्वारा,
सम्मोहितम् = महामोह से त्रस्त है,
प्रसन्ना त्वम् वै = प्रसन्न अवस्था में ही आप,
भुवि = संसार में,

असि = हैं,
देवि = हे देवि !,
मुक्तिहेतु: = मुक्ति का कारण हैं ।।५ ।।

मन्त्र

विद्या: समस्तास्तव देवि भेदा:
स्त्रिय: समस्ता: सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्
का ते स्तुति: स्तव्यपरा परोक्ति: ।।६ ।।

पदच्छेद

विद्या: समस्ता: तव देवि भेदा:
स्त्रिय: समस्ता: सकला: जगत्सु ।
त्वया एकया पूरितम् अम्बया एतत्
का ते स्तुति: स्तव्य परा अपरा उक्ति: ।।६ ।।

अन्वित-पदार्थ

देवि = हे भगवती !,
जगत्स = तीनों लोकों में,
समस्ता: = सभी,
विद्या = विद्याएँ,
सकला: = कलाओं से युक्त,
समस्ता: = सभी,
स्त्रिय: = स्त्रियाँ,
तव भेदा: = आप का ही भेदरूप हैं,
एकया = एकमात्र,
त्वया अम्बया = आप अम्बा की सत्ता से,
एतत् = ये सभी लोक,
पूरितम् = व्याप्त है,
ते स्तव्यपरा = आपके स्तवन के योग्य,
स्तुति: = स्तुति के रूप में,
अपरा उक्ति: का = दूसरा क्या कहा जा सकता है सभी कुछ तो आप हैं ।।६ ।।

मन्त्र

सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तय: ।।७ ।।

पदच्छेद

सर्व-भूता यदा देवी स्वर्ग-मुक्ति-प्र-दायिनी ।
त्वम् स्तुता स्तुतये का वा भवन्तु परमा-उक्तय: ।।७ ।।

अन्वित-पदार्थ

स्वर्गमुक्तिप्रदायिनी = हे स्वर्ग तथा मोक्ष प्रदान करनेवाली,
देवी = भगवती,
यदा = जब,
सर्वभूता = आप सब कुछ हैं,
त्वम् = तब आपकी,
स्तुता = प्रार्थना पूर्ण हो चुकी,
स्तुतये = सर्वरूपिणी की स्तुति के लिए,
का वा = कौन सी,
परमाः उक्तयः = सर्वोत्तम वाणी या पद समूह,
भवन्त = हो सकते हैं ।।७ ।।

मन्त्र

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ।।८ ।।

पदच्छेद

सर्वस्य बुद्धि-रूपेण जनस्य हृदि सम्-स्थिते ।
स्वर्ग-अप-वर्ग-दे देवि नारायणि नमः अस्तु ते ।।८ ।।

अन्वित-पदार्थ

सर्वस्य = सभी,
जनस्य = प्राणियों के,
हृदि = हृदय में,
बुद्धिरूपेण = बुद्धिरूप में,
संस्थित = स्थित,
स्वर्गापवर्गद = स्वर्ग का सुख तथा मोक्ष का परम लक्ष्य प्रदान करनेवाली,
देवि नारायणि = हे भगवति नारायणि,
ते नमः अस्तु = आपको प्रणाम है ।।८ ।।

मन्त्र

कलाकाष्ठादिरूपेण परिणामप्रदायिनि ।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ।।९ ।।

पदच्छेद

कला-काष्ठा-आदि-रूपेण परिणाम-प्रदायिनि ।
विश्वस्य उपरतौ शक्ते नारायणि नमः अस्तु ते ।।९ ।।

अन्वित-पदार्थ

कलाकाष्ठादिरूपेण = कला, काष्ठा आदि सूक्ष्म कालखण्डों के माध्यम से, **परिणामस्य** = चय अपचय रूप में परिणाम, **प्रदायिनि** = प्रदान करनेवाली, **विश्वस्य** = विश्व के, **उपरतौ** = संहार में, **शक्ते** = समर्थ, **नारायणि** = हे भगवति नारायणि, **ते नमः अस्तु** = आपको प्रणाम है ।।९ ।।

मन्त्र

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ।।१० ।।

पदच्छेद

सर्व-मङ्गल-माङ्गल्ये शिवे सर्व-अर्थ-साधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमः अस्तु ते ।।१० ।।

अन्वित-पदार्थ

सर्वमङ्गलानाम् = सभी कल्याणकारक तत्त्वों का भी, **माङ्गल्ये** = कल्याण करनेवाली, **शिवे** = कल्याण रूपिणी, **सर्वेषाम्** = अर्थ, धर्म, काम, मोक्ष सभी प्रकार के, **अर्थानाम्** = प्राप्तव्य पदार्थों, **साधिके** = सिद्ध करानेवाली, **शरण्ये** = सर्वोत्तम शरणस्थली, **त्र्यम्बके** = त्रिनयने, **गौरि** = गौर वर्णवाली, **नारायणि** = हे परात्परशक्ति नारायणि, **ते नमः अस्तु** = आपको प्रणाम है ।।१० ।।

मन्त्र

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ।।११ ।।

पदच्छेद

सृष्टिः स्थिति-वि-नाशानाम् शक्ति-भूते सनातनि ।
गुण-आश्रये गुण-मये नारायणि नमः अस्तु ते ।।११ ।।

अन्वित-पदार्थ

सृष्टेः = निर्मिति,
स्थितेः = पालन,
विनाशस्य = संहार की,
शक्तिभूते = मूल शक्ति,
सनातनि = भूत वर्तमान एवं भविष्यत् तीनों कालों में सत्तावाली,
गुणानाम् = सत्त्व, रजस् एवं तमस् गुणों की,
आश्रये = अधिष्ठान रूपिणि,
गुणमये = त्रिगुणात्मिके,
नारायणि = हे परात्परशक्ति नारायणि,
ते नमः अस्तु = आपको प्रणाम है ।।११ ।।

मन्त्र

शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्त्तिहरे देवि नारायणि नमोऽस्तु ते ।।१२ ।।

पदच्छेद

शरण-आगत-दीन-आर्त-परि-त्राण-परायणे ।
सर्वस्य-आर्त्ति-हरे देवि नारायणि नमः अस्तु ते ।।१२ ।।

अन्वित-पदार्थ

शरणागतानाम् = शरण में आए हुए,
दीनानाम् = अभावों के कारण दीन,
आर्तानाम् = दुःखी भक्तों के,
परित्राणपरायण = सर्वथा संरक्षण में संलग्न,
सर्वस्य आर्तिहरे = सभी प्राणियों का कष्ट दूर करनेवाली,
देवि नारायणि = हे भगवती पराशक्ति,
ते नमः अस्त = आपको प्रणाम है ।।१२ ।।

मन्त्र

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ।।१३ ।।

पदच्छेद

हंस-युक्त-वि-मान-स्थे ब्रह्माणी-रूप-धारिणि ।
कौशाम्भः क्षरिके देवि नारायणि नमः अस्तु ते ।।१३ ।।

अन्वित-पदार्थ

हंसेन युक्ते = हंस जुते हुए,
विमानस्थे = विमान पर
विराजमान,
ब्रह्माणीरूपधारिणि =
ब्राह्मी शक्ति का रूप
धारण करनेवाली,
कौशाम्भःक्षरिके = कुशों से
जल को प्रवाहित करनेवाली,
देवि नारायणि = हे भगवती
पराशक्ति,
ते नमः अस्तु = आपको
प्रणाम है ।।१३ ।।

मन्त्र

त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ।।१४ ।।

पदच्छेद

त्रि-शूल चन्द्र-अहि-धरे महा-वृषभ-वाहिनि ।
माहेश्वरी-स्व-रूपेण नारायणि नमः अस्तु ते ।।१४ ।।

अन्वित-पदार्थ

त्रिशूलचन्द्राहिधरे =
त्रिशूल चन्द्रमा तथा
सर्पों को धारण
करनेवाली,
महावृषभवाहिनि =
विशाल बैल
पर सवार,
माहेश्वरीस्वरूपेण = महेश्वर
शिव की शक्ति के स्वरूप के
माध्यम से प्रकट,
नारायणि = हे पराशक्ति
नारायणि,
ते नमः अस्तु = आपको
प्रणाम है ।।१४ ।।

मन्त्र

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ।।१५ ।।

पदच्छेद

मयूर-कुक्कुट-वृते महा-शक्ति-धरे अनघे ।
कौमारी-रूप-सम्-स्थाने नारायणि नमः अस्तु ते ।।१५ ।।

अन्वित-पदार्थ

मयूराणाम् = मोर समूहों के, **कुक्कुटेन** = पिच्छों एवं चन्द्रिकाओं से, **वृते** = आवृत, **महाशक्तिधर** = विशाल शक्ति आयुध धारण करनेवाली, **अनघे** = निष्कलङ्क, **कौमारीरूपसंस्थाने** = कुमार कार्तिकेय की शक्ति का रूप धारण करनेवाली, **नारायणि** = हे पराशक्ति नारायणि, **ते नमः अस्तु** = आपको प्रणाम है ।।१५ ।।

मन्त्र

शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ।।१६ ।।

पदच्छेद

शङ्ख-चक्र-गदा-शार्ङ्ग-गृहीत-परम-आयुधे ।
प्रसीद वैष्णवी-रूपे नारायणि नमः अस्तु ते ।।१६ ।।

अन्वित-पदार्थ

वैष्णवीरूप = विष्णु की शक्ति के रूप में, **शङ्ख-चक्र-गदा-शार्ङ्ग-गृहीत-परमायुधे** = शङ्ख, सुदर्शन चक्र, कौमोदिकी गदा, शार्ङ्ग धनुष के रूप में परम श्रेष्ठ आयुधों को धारण करनेवाली, **नारायणि** = हे परात्परशक्ति नारायणि, **ते नमः अस्तु** = आपको प्रणाम है ।।१६ ।।

मन्त्र

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ।।१७ ।।

पदच्छेद

गृहीत-उग्र-महा-चक्रे दंष्ट्रा-उद्-धृत-वसुन्धरे ।
वराह-रूपिणि शिवे नारायणि नमः अस्तु ते ।।१७ ।।

अन्वित-पदार्थ

गृहीतोग्रमहाचक्रे = हे प्रचण्ड उग्रचक्र लिये हुए,
दंष्ट्रोद्धृतवसुन्धरे = अपनी दाढ़ से हिरण्याक्ष के बन्धन से धरती का उद्धार करनेवाली,
वराहरूपिणि = हे वाराही शक्ति,
शिवे = हे कल्याण रूपिणि,
नारायणि = हे पराशक्ति नारायणि,
ते नमः अस्तु = आपको प्रणाम है ।।१७ ।।

मन्त्र

नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ।।१८ ।।

पदच्छेद

नृ-सिंह-रूपेण उग्रेण हन्तुम् दैत्यान् कृत-उद्यमे ।
त्रै-लोक्य-त्राण-सहिते नारायणि नमः अस्तु ते ।।१८ ।।

अन्वित-पदार्थ

उग्रेण = प्रचण्ड,
नृसिंहरूपेण = नारसिंही शक्ति के रूप में,
दैत्यान् = दैत्यों को,
हन्तुम् = मारने का,
कृतोद्यम = सुकर्म करनेवाली,
त्रैलोक्यस्य = तीनों लोकों की,
त्राणाय = रक्षा के लिए,
सहिते = सर्वथा हितकारिणी,
नारायणि = हे पराशक्ति नारायणि,
ते नमः अस्तु = आपको प्रणाम है ।।१८ ।।

मन्त्र

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ।।१९ ।।

पदच्छेद

किरीटिनि महा-वज्रे सहस्र-नयनैः उत्-ज्वले ।
वृत्र-प्राण-हरे च ऐन्द्रि नारायणि नमः अस्तु ते ।।१९ ।।

अन्वित-पदार्थ

किरीटिनि = हे किरीट धारिणी,
महावज्रे = विशाल वज्र धारिणी,
सहस्रनयनै: = हजार नेत्रों द्वारा,
उज्ज्वले = ज्योतिष्मती,
वृत्रस्य च = और वृत्रासुर की,
प्राणहरे = विनाशिका,
ऐन्द्रि = इन्द्र की शक्ति,
नारायणि = हे पराशक्ति नारायणि,
ते नम: अस्तु = आपको प्रणाम है ।।१९ ।।

मन्त्र

शिवदूतीस्वरूपेण हतदैत्यमहाबले ।
घोररूपे महारावे नारायणि नमोऽस्तु ते ।।२० ।।

पदच्छेद

शिव-दूती-स्व-रूपेण हत-दैत्य-महा-बले ।
घोर-रूपे महा-रावे नारायणि नम: अस्तु ते ।।२० ।।

अन्वित-पदार्थ

शिवदूतीस्वरूपेण = चण्डिका के शरीर से प्रकट कल्याण परक सन्देश देनेवाली,
हतदैत्यमहाबले = शुम्भादि दैत्यों की विशाल सेना को नष्ट करनेवाली,
घोररूपे = विकराल स्वरूपवाली,
महारावे = भयानक घोष करनेवाली,
नारायणि = हे पराशक्ति नारायणि,
ते नम: अस्तु = आपको प्रणाम है ।।२० ।।

मन्त्र

दंष्ट्राकरालवदने शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ।।२१ ।।

पदच्छेद

दंष्ट्रा-कराल-वदने शिर:-माला-वि-भूषणे ।
चामुण्डे मुण्ड-मथने नारायणि नम: अस्तु ते ।।२१ ।।

अन्वित-पदार्थ

दंष्ट्रया = दाढ़ों के कारण, **करालवदने** = भयानक मुखवाली, **शिरसाम्** = मुण्डों की, **मालाविभूषणे** = माला से अलंकृत, **मुण्डमथने** = चण्डमुण्ड नामक दैत्यों का विनाश करनेवाली, **चामुण्डे** = हे चामुण्डा भगवति, **नारायणि** = हे पराशक्ति नारायणि, **ते नमः अस्तु** = आपको प्रणाम है ।।२१ ।।

मन्त्र

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे ।
महारात्रि महाऽविद्ये नारायणि नमोऽस्तु ते ।।२२ ।।

पदच्छेद

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ।
महा-रात्रि महा-अ-विद्ये नारायणि नमः अस्तु ते ।।२२ ।।

अन्वित-पदार्थ

लक्ष्मि = हे श्रीः, समृद्धि रूपिणि, **लज्जे** = हे जगत् की उत्पत्ति-स्थल स्वरूप, **महाविद्य** = हे मुक्ति साधिका पराविद्या, **श्रद्धे** = हे पवित्र विश्वास स्वरूपा भगवति, **पुष्टि** = हे विश्वशरीर के विकास एवं पोषण स्वरूपिणि, **स्वधे** = हे पितरों की तृप्ति रूपिणि, **ध्रुवे** = हे त्रिकाल में अविकृत रहनेवाली, **महारात्रि** = हे वेद वर्णित महामोहमयी प्रलयकालीन रात्रि, **महाऽविद्ये** = हे संसार को प्रवर्तित करनेवाली महा अज्ञान रूपिणि अविद्या, **नारायणि** = हे पराशक्ति नारायणि, **ते नमः अस्त** = आपको प्रणाम है ।।२२ ।।

मन्त्र

मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ।।२३ ।।

पदच्छेद

मेधे सरस्वति वरे भूति बाभ्रवि तामसि।
नियते त्वम् प्रसीद ईशे नारायणि नमः अस्तु ते ।।२३।।

अन्वित-पदार्थ

मेधे = हे धारणात्मिका बोधरूपिणि,
सरस्वति = हे वाणी की दिव्य शक्ति,
वरे = हे श्रेष्ठतम तत्त्वरूपिणि,
भूति = सत्त्वगुण प्रधान तत्त्वरूपिणि,
बाभ्रवि = हे कपिलवर्णा रजोगुण प्रधान तत्त्वरूपिणि,
तामसि = हे तमोगुण प्रधान तत्त्वरूपिणि,
नियते = हे नियतिरूपिणि मूलशक्ति,
ईश = हे सब की स्वामिनी,
नारायणि = हे नारायणि,
त्वं प्रसीद = आप प्रसन्न हों,
ते नमः अस्तु = आपको प्रणाम है ।।२३।।

मन्त्र

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ।।२४।।

पदच्छेद

सर्व-स्व-रूपे सर्व-ईशे सर्व-शक्ति-सम्-अनु-इते।
भयेभ्यः त्राहि नः देवि दुर्गे देवि नमः अस्तु ते ।।२४।।

अन्वित-पदार्थ

सर्वस्वरूप = हे विश्वरूपिणि,
सर्वेषाम् = हे सभी ज्ञात-अज्ञात पदार्थों की,
ईशे = स्वामिनि,
सर्वशक्तिसमन्विते = हे सभी प्रकार की शक्तियों से युक्त,
देवि = हे प्रकाशमान,
भयेभ्यः नः = हमें सभी प्रकार के भयों से,
त्राहि = सुरक्षित करें,
देवि दुर्गे = हे देवि दुर्गे,
ते नमः अस्तु = आपको प्रणाम है ।।२४।।

मन्त्र

एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ।।२५ ।।

पदच्छेद

एतत् ते वदनम् सौम्यम् लोचनत्रय विभूषितम् ।
पातु नः सर्व–भीतिभ्यः कात्यायनि नमः अस्तु ते ।।२५ ।।

अन्वित–पदार्थ

ते एतत् = आपका यह,
लोचनत्रयभूषितम् = सोम, सूर्य एवं अग्निमय तीन नेत्रों से अलंकृत,
वदनम् = मुखमण्डल,
सौम्यम् = आह्लाद जनक है,
कात्यायनि = हे कात्यायन के आश्रम में प्रकट होनेवाली,
सर्वभीतिभ्यः = सभी भयों से,
पातु नः = हमारी रक्षा करें,
नमः अस्तु ते = आपको प्रणाम है ।।२५ ।।

मन्त्र

ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ।।२६ ।।

पदच्छेद

ज्वाला–करालम् अति–उग्रम् अ–शेष–असुर–सूदनम् ।
त्रिशूलम् पातु नः भीतेः भद्र–कालि नमः अस्तु ते ।।२६ ।।

अन्वित–पदार्थ

भद्रकालि = हे भद्रकालि,
ज्वालया = ज्वाला से युक्त होने के कारण,
करालम् = भयानक,
अति–उग्रम् = प्रचण्ड आक्रामक,
अशेषाणाम् = समस्त,
असुराणाम् = राक्षसों का,
सूदनम् = विनाशक,
त्रिशूलम् = आपका त्रिशूल,
भीतेः नः पात = भय से हमारी रक्षा करे,
ते नमः अस्तु = आपको प्रणाम है ।।२६ ।।

मन्त्र

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव ।।२७।।

पदच्छेद

हिनस्ति दैत्य-तेजांसि स्वनेन आ-पूर्य या जगत्।
सा घण्टा पातु नः देवि पापेभ्यः अनः सुतान् इव ।।२७।।

अन्वित-पदार्थ

देवि = हे भगवति, **या घण्टा** = जो घण्टा, **जगत् स्वनेन आपूर्य** = संसार को अपने निनाद से गुञ्जायमान करके, **दैत्यानाम् तेजांसि** = राक्षसों के तेज को, मनोबल को, **हिनस्ति** = समाप्त कर देता है, **सा** = वह आपका घण्टा, **सुतान् इव** = जैसे माता पुत्र की रक्षा करती है, **पापेभ्यः नः पातु** = दुराचरणों से, कुमार्ग से हमारी रक्षा करें ।।२७।।

मन्त्र

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ।।२८।।

पदच्छेद

असुर-असृग्-वसा-पङ्क-चर्चितः ते कर-उज्ज्वलः।
शुभाय खड्गः भवतु चण्डिके त्वाम् नताः वयम् ।।२८।।

अन्वित-पदार्थ

चण्डिके = हे चण्डिके, **असुराणाम्** = राक्षसों के, **असृजः** = रक्त, **वसायाः** = एवं मेदस् के, **पङ्केन** = कीचड़ से, **चर्चितः** = सना हुआ, **ते करोज्ज्वलः** = आपके हाथों की किरणों से चमकता हुआ, **खड्ग** = खड्ग, **शुभाय भवत** = हमारा कल्याण करे, **त्वाम् वयम् नताः** = हम सभी देवमण्डली आपके शरण में विनत हैं ।।२८।।

मन्त्र

रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ।।२९ ।।

पदच्छेद

रोगान् अशेषान् अपहंसि तुष्टा
रुष्टा तु कामान् सकलान् अभीष्टान् ।
त्वाम् आ-श्रितानाम् न विपत्-नराणाम्
त्वाम् आ-श्रिता: हि आश्रयताम् प्र-यान्ति ।।२९ ।।

अन्वित-पदार्थ

तुष्टा = प्रसन्न होने पर, **अशेषान् रोगान्** = समस्त दैहिक, भौतिक, दैविक रोगों को, **रुष्टा तु** = अप्रसन्न होने पर, **सकलान्** = सभी, **अभीष्टान् कामान्** = भोग एवं मोक्ष रूपी कामनाओं को, **अपहंसि** = विनष्ट कर देती हैं, **त्वाम्** = आपके, **आश्रितानाम् नराणाम्** = शरण में रहनेवाले मनुष्यों को, **विपत् न** = किसी प्रकार की विपत्ति नहीं होती, **त्वमाश्रिता: हि** = आपके आश्रित रहनेवाले तो, **आश्रयताम् प्रयान्ति** = स्वयं आश्रय प्रदान करने का सामर्थ्य रखते हैं ।।२९ ।।

मन्त्र

एतत्कृतं यत्कदनं त्वयाद्य
धर्मद्विषां देवि महासुराणाम् ।
रूपैरनेकैर्बहुधाऽऽत्ममूर्तिं
कृत्वाम्बिके तत्प्रकरोति कान्या ।।३० ।।

पदच्छेद

एतत् कृतम् यत् कदनम् त्वया अद्य
धर्मद्विषाम् देवि महासुराणाम् ।

रूपैः अनेकैः बहुधा आत्ममूर्तिम्

कृत्वा अम्बिके तत् प्रकरोति का अन्या ।।३० ।।

अन्वित-पदार्थ

देवि = हे देवि !,
अद्य = अभी-अभी,
त्वया = आपके द्वारा,
धर्मद्विषाम् = धर्मद्रोही,
महासुराणाम् =
महाराक्षसों का,
बहुधा = अनेक प्रकार से,
आत्ममूर्तिम् = अपने विग्रह को,
कृत्वा = प्रकट करके,
अनेकैः = अनेक,
रूपैः = रूपों के माध्यम से,
यत् = जो,
एतत् = यह,
कदनम् = संहार,
कृतम् = किया गया है,
अम्बिके = हे अम्बिका,
का अन्या = कौन दूसरा,
तत् = उस तरह से,
प्रकरोति = करता है, आप
ही समर्थ हैं ।।३० ।।

मन्त्र

विद्यासु शास्त्रेषु विवेकदीपे-

ष्वाद्येषु वाक्येषु च का त्वदन्या ।

ममत्वगर्तेऽतिमहान्धकारे

विभ्रामयत्येतदतीव विश्वम् ।।३१ ।।

पदच्छेद

विद्यासु शास्त्रेषु विवेक-दीपेषु

आद्येषु वाक्येषु च का त्वद्-अन्या ।

ममत्व-गर्ते अति-महा-अन्ध-कारे

वि-भ्रामयति एतत् अति इव विश्वम् ।।३१ ।।

अन्वित-पदार्थ

विद्यासु = सभी प्रकार के
बोधात्मक ज्ञान से,
शास्त्रेषु = ज्ञान के साधन
रूप शास्त्रों,
अतिमहा अन्धकारे = अत्यन्त
महान् दुर्गम्य अन्धकार रूप,
ममत्वस्यगर्ते = ममता 'ये मेरा
है मैं करता हूँ' आदि के गड्ढे में,

विवेकदीपेषु = सत् असत् विवेचन करानेवाले उपनिषदों,
आद्येषु च = और प्रथम,
वाक्येषु = वाक्यरूप वेदों के होते हुए भी,
त्वत्तः अन्या = आपके अतिरिक्त,
का = कौन,
विभ्रामयति = बारम्बार प्रवर्तित करता है, आप ही इसमें कारण हैं ।।३१ ।।

मन्त्र

रक्षांसि यत्रोग्रविषाश्च नागा
यत्रारयो दस्युबलानि यत्र ।
दावानलो यत्र तथाब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वम् ।।३२ ।।

पदच्छेद

रक्षांसि यत्र उग्र–विषाः च नागाः
यत्र अरयः दस्यु–बलानि यत्र ।
दाव–अनलः यत्र तथा–अब्धि–मध्ये
तत्र स्थिता त्वम् परि–पासि विश्वम् ।।३२ ।।

अन्वित–पदार्थ

यत्र = जहाँ,
रक्षांसि = राक्षस हों,
यत्र च = और जहाँ,
उग्रविषाः = भयानक विषवाले,
नागाः = सर्प हों,
यत्र = जहाँ,
दस्युबलानि = चोर डाकुओं का झुण्ड हो,
यत्र = जहाँ,
अरयः = शत्रु समूह हो,
यत्र = जहाँ,
दावानलः = जंगली आग हो,
तथा = तथा,
अब्धि मध्ये = समुद्र के बीच में,
तत्र स्थिता = उन सभी स्थानों पर विराजमान होकर,
त्वम् = आप,
विश्वम् = विश्व की,
परिपासि = रक्षा करती हैं ।।३२ ।।

मन्त्र

विश्वेश्वरि त्वं परिपासि विश्वं
विश्वात्मिका धारयसीति विश्वम् ।
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्राः ।।३३ ।।

पदच्छेद

विश्व–ईश्वरि त्वम् परि–पासि विश्वम्
विश्व–आत्मिका धारयसि इति विश्वम् ।
विश्व–ईश–वन्द्या भवती भवन्ति
विश्व–आश्रयाः ये त्वयि भक्ति–नम्राः ।।३३ ।।

अन्वित–पदार्थ

त्वम् = आप,
विश्वेश्वरि = संसार की अधीश्वरी हैं अतः,
विश्वम् = संसार का,
परिपासि = भली प्रकार से पालन करती हैं,
विश्वात्मिका इति = आप विश्वरूपिणी हैं अतः,
विश्वम् = संसार को,
धारयसि = स्वरूप में धारण करती हैं,
भवती विश्वेशस्य–वन्द्या = आप विश्व पर प्रभुत्व रखनेवाले ब्रह्मा विष्णु एवं शिव के द्वारा पूजित हैं,
ये त्वयि = जो आपके प्रति,
भक्त्या = भक्तिभाव के कारण,
नम्राः = विनम्र हैं, शरणागत हैं वे,
विश्वाश्रयाः = विश्व के आश्रयदाता,
भवन्ति = हो जाते हैं ।।३३ ।।

मन्त्र

देवि प्रसीद परिपालय नोऽरिभीते–
र्नित्यं यथासुरवधादधुनैव सद्यः ।
पापानि सर्वजगतां प्रशमं नयाशु
उत्पातपाकजनितांश्च महोपसर्गान् ।।३४ ।।

पदच्छेद

देवि प्रसीद परि-पालय नः अरि-भीतेः
नित्यम् यथा असुर-वधात् अधुना एव सद्यः।
पापानि सर्व-जगताम् प्र-शमम् नय आशु
उत्-पात-पाक-जनिताम् च महा-उपसर्गान्।।३४।।

अन्वित-पदार्थ

देवि = हे भगवती!, **प्रसीद** = आप प्रसन्न हों, **नित्यम्** = सदा, **अरीणाम्** = शत्रुओं के, **भीतेः परिपालय नः** = भय से हमारी रक्षा करें, **अधुना एवम्** = यथा अभी ही जैसे, **असुरवधात्** = असुरों के वध से, शत्रुभय से आपने हमारी रक्षा की है, **सर्वजगताम्** = सम्पूर्ण जगत् के, **पापानि** = पापों को, **सद्यः** = तुरन्त, **प्रशमम्** = समाप्ति के प्रति, **नय** = ले जाएँ, **आशु च** = और तत्काल ही, **उत्पातपाकजनिताम्** = प्राकृतिक उत्पातों के परिणाम से उत्पन्न, **महोपसर्गान्** = महाविनाशों को, **प्रशमं नय** = समाप्ति की ओर ले जायें।।३४।।

मन्त्र

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव।।३५।।

पदच्छेद

प्रणतानाम् प्रसीद त्वम् देवि विश्व-आर्ति-हारिणि।
त्रैलोक्ये वासिनाम् ईड्ये लोकानाम् वरदा भव।।३५।।

अन्वित-पदार्थ

विश्वस्य = हे विश्व के, **आर्तिहारिणि** = कष्टों को हरण करनेवाली, **त्रैलोक्ये** = हे तीनों लोकों में, **वासनामीड्ये** = रहनेवाले सुर,

देवि = भगवती,
त्वम् = आप,
प्रणतानाम् = शरणागत भक्तों के लिए,
प्रसीद = प्रसन्न रहें,
नर, मुनि की आराध्या,
लोकानाम् = आप सम्पूर्ण समाज के लिए,
वरदा भव = इच्छित वर देनेवाली बनी रहें ।।३५।।

मन्त्र

देव्युवाच ।।३६।।

वरदाहं सुरगणा वरं यन्मनसेच्छथ ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ।।३७।।

पदच्छेद

देवी उवाच ।।३६।।
वरदा अहम् सुरगणाः वरम् यत् मनसा इच्छथ ।
तम् वृणुध्वम् प्रयच्छामि जगताम् उपकारकम् ।।३७।।

अन्वित-पदार्थ

देवी उवाच = देवी बोलीं ।।३६।।
सुरगणाः = हे देववृन्द,
अहम् = मैं,
वरदा = वर प्रदात्री हूँ,
यत् = जो,
मनसा = मन द्वारा,
इच्छथ = इच्छित हो,
तम् वरम् = उस वर को,
वृणुध्वम् = माँगो,
जगताम् = विश्व का,
उपकारकम् = कल्याण करनेवाले वर को,
प्रयच्छामि = मैं प्रदान करूँगी ।।३७।।

मन्त्र

देवा ऊचुः ।।३८।।

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ।।३९।।

पदच्छेद

देवाः ऊचुः ।।३८।।
सर्वा(साम्) बाधा(नाम्) प्रशमनम् त्रैलोक्यस्य अखिल-ईश्वरि ।
एवम् एव त्वया कार्यम् अस्मद् वैरि-वि-नाशनम् ।।३९।।

अन्वित-पदार्थ

देवाः उचुः = देवतागण बोले ।।३८ ।।
त्रैलोक्यस्य = हे तीनों लोकों की,
अखिलेश्वरि = अधीश्वरी,
एवं एव = इसी प्रकार ही,
सर्वासाम् = सभी,
बाधानाम् = बाधाओं का,
प्रशमनम् = समापन,
अस्मत् = हमारे,
वैरीणाम् = शत्रुओं का,
विनाशनम् = विनाश,
त्वया कार्यम् = आपके द्वारा किया जाना चाहिए ।।३९ ।।

मन्त्र

देव्युवाच ।।४० ।।

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ।।४१ ।।

पदच्छेद

देवी उवाच ।।४० ।।
वैवस्वते अन्तरे प्राप्ते अष्टा-विंशति-तमे युगे ।
शुम्भः निशुम्भः च एव अन्यौ उत्पत्स्येते महा-असुरौ ।।४१ ।।

अन्वित-पदार्थ

देवी उवाच = भगवती बोलीं ।।४० ।।
वैवस्वत = वैवस्वत नामक,
अन्तरे = मन्वन्तर,
प्राप्ते = आने पर,
अष्टांविशतितम = उसके अट्ठाईसवें,
युगे = कलियुग में,
अन्यौ एव = अन्य ही,
शुम्भः निशुम्भः च = शुम्भ और निशुम्भ,
महासुरौ = नामक महाराक्षस,
उत्पत्स्येते = उत्पन्न होंगे ।।४१ ।।

मन्त्र

नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ।।४२ ।।

पदच्छेद

नन्दगोप–गृहे जाता यशोदा–गर्भ–सम्–भवा।
ततः तौ नाशयिष्यामि विन्ध्याचल–निवासिनी ।। ४२ ।।

अन्वित–पदार्थ

ततः = उस समय,
नन्दगोपस्य = नन्द नामक गोपालक के,
गृहे = घर में,
जाता = उत्पन्न,
यशोदायाः = यशोदा के,
गर्भसम्भवाः = गर्भ में जन्मी,
विन्ध्याचलनिवासिनी = विन्ध्याचल पर निवास करनेवाली आदिशक्ति,
तौ = उन दोनों का,
नाशयिष्यामि = विनाश करूँगी ।।४२ ।।

मन्त्र

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ।
अवतीर्य हनिष्यामि वैप्रचित्ताँश्च दानवान् ।।४३ ।।

पदच्छेद

पुनः अपि अति–रौद्रेण रूपेण पृथिवी–तले।
अव–तीर्य हनिष्यामि वैप्रचित्तान् च दानवान् ।।४३ ।।

अन्वित–पदार्थ

पुनः अपि = उसके अतिरिक्त भी,
अतिरौद्रेण = अति भयानक,
रूपेण = रूप से,
पृथिवीतले = पृथिवी पर,
अवतीर्य = अवतरित होकर,
वैप्रचित्तान् च = वैप्रचित्त जाति के,
दानवान् = राक्षसों को,
हनिष्यामि = मारूँगी ।।४३ ।।

मन्त्र

भक्षयन्त्याश्च तनुग्रान् वैप्रचित्तान्महासुरान् ।
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ।।४४ ।।

पदच्छेद

भक्षयन्त्याः च तान् उग्रान् वैप्रचित्तान् महा-असुरान् ।
रक्ताः दन्ताः भविष्यन्ति दाडिमी-कुसुम-उपमाः ।।४४ ।।

अन्वित-पदार्थ

तान् उग्रान् च = और उन भयानक, **वैप्रचित्तान्** = वैप्रचित्त नामक, **महासुरान्** = राक्षसों को, **भक्षयन्त्याः** = खाने से, **दाडिमीकुसुमोपमाः** = अनार के फूलों की तरह, **दन्ताः** = दाँत, **रक्ता** = लाल, **भविष्यन्ति** = हो जाएँगे ।।४४ ।।

मन्त्र

ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ।।४५ ।।

पदच्छेद

ततः माम् देवताः स्वर्गे मर्त्य लोके च मानवाः ।
स्तुवन्तः वि-आ-हरिष्यन्ति सततम् रक्त-दन्तिकाम् ।।४५ ।।

अन्वित-पदार्थ

ततः = इसके पश्चात्, **माम्** = मेरी, **स्वर्गे देवताः** = स्वर्ग में देवता, **मर्त्ये लोके च** = और मृत्युलोक में, **मानवाः** = मनुष्यगण, **सततम्** = अनवरत, **स्तुवन्तः** = स्तुति करते हुए, **रक्तदन्तिकाम्** = रक्तदन्तिका नाम से, **व्याहरिष्यन्ति** = पुकारेंगे ।।४५ ।।

मन्त्र

भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ।
मुनिभिः संस्मृता भूमौ सम्भविष्याम्ययोनिजा ।।४६ ।।

पदच्छेद

भूयः च शतवार्षिक्याम् अन्-आ-वृष्ट्याम् अन्-अम्भसि ।
मुनिभिः सम्-स्मृता भूमौ सम्-भविष्यामि अ-योनिजा ।।४६ ।।

अन्वित-पदार्थ

भूयः च = और पुनः, **शतवार्षिक्याम्** = सौ वर्षों तक, **अनावृष्ट्याम्** = वर्षा न होने पर, **अनम्भसि** = जल विहीन, **भूमौ** = धरती पर, **मुनिभिः** = मुनियों द्वारा, **संस्मृता** = स्मरण किये जाने पर, **अयोनिजा** = अयोनिज रूप में, **सम्भविष्यामि** = प्रकट होऊँगी ।।४६ ।।

मन्त्र

ततः शतेन नेत्राणां निरीक्षिष्याम्यहं मुनीन् ।
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ।।४७ ।।

पदच्छेद

ततः शतेन नेत्राणाम् निर्-ईक्षिष्यामि अहम् मुनीन् ।
कीर्तयिष्यन्ति मनुजाः शताक्षीम् इति माम् ततः ।।४७ ।।

अन्वित-पदार्थ

ततः = उस समय, **यत् मुनीन्** = क्योंकि मुनिजनों को, **शतेन नेत्राणाम्** = सौ नेत्रों से, **अहम्** = मैं, **निरीक्षिष्यामि** = देखूँगी, **ततः अतः** = उसके बाद से, **मनुजाः** = मनुष्यगण, **शताक्षीम् इति** = 'शताक्षी' इस नाम से, **माम्** = मेरा, **कीर्तयिष्यन्ति** = कीर्तन करेंगे ।।४७ ।।

मन्त्र

ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ।।४८ ।।

पदच्छेद

ततः अहम् अ-खिलम् लोकम् आत्म-देह सम्-उद्भवैः ।
भरिष्यामि सुराः शाकैः आ-वृष्टेः प्राण-धारकैः ।।४८ ।।

अन्वित-पदार्थ

सुराः = हे देवगण, **ततः** = इसके अनन्तर, **अहम्** = मैं, **अखिलम् लोकम्** = सम्पूर्ण विश्व का, **आत्मदेहात् समुद्भवैः** = अपने शरीर से उत्पन्न, **प्राणानाम् धारकैः** = प्राणरक्षक, **शाकैः** = शाकों के माध्यम से, **आवृष्टेः** = जब तक वर्षा नहीं होगी तब तक, **भरिष्यामि** = भरण-पोषण करूँगी ।।४८ ।।

मन्त्र

शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ।।४९ ।।

पदच्छेद

शाकम्भरी इति वि-ख्यातिम् तदा यास्यामि अहम् भुवि ।
तत्र एव च वधिष्यामि दुर्गम् आख्यम् महा-असुरम् ।।४९ ।।

अन्वित-पदार्थ

तदा = तब, **भुवि** = धरती पर, **अहम्** = मैं, **शाकम्भरी इति** = शाकम्भरी नाम से, **विख्यातिम्** = प्रसिद्धि, **यास्यामि** = प्राप्त करूँगी, **तत्र एव च** = उसी स्थान पर, **दुर्गम् आख्यम्** = दुर्ग नामक, **महासुरम्** = महादानव का, **वधिष्यामि** = वध करूँगी ।।४९ ।।

मन्त्र

दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति ।
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ।।५० ।।

पदच्छेद

दुर्गा देवी इति वि-ख्यातम् तत् मे नाम भविष्यति ।
पुनः च अहम् यदा भीमम् रूपम् कृत्वा हिम-अचले ।।५० ।।

अन्वित-पदार्थ

तत् मे नाम = इससे मेरा नाम, **दुर्गादेवी इति** = दुर्गादेवी के नाम से, **विख्यातम्** = प्रसिद्ध, **भविष्यति** = होगा, **पुनः च यदा** = और फिर जब, **अहम्** = मैं, **भीमम् रूपम्** = विशाल देह, **कृत्वा** = धारण करके, **हिमाचल** = हिमालय पर ।।५०।।

मन्त्र

रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ।
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ।।५१ ।।

पदच्छेद

रक्षांसि भक्षयिष्यामि मुनीनाम् त्राण (स्य) कारणात् ।
तदा माम् मुनयः सर्वे स्तोष्यन्ति आनम्रमूर्तयः ।।५१ ।।

अन्वित-पदार्थ

रक्षांसि = राक्षसों का, **भक्षयिष्यामि** = भक्षण करूँगी, **मुनीनाम्** = मुनियों की, **त्राणस्य कारणात्** = प्राण रक्षा के कारण, **तदा** = तब, **माम्** = मेरा, **आनम्रमूर्तयः** = पूर्ण नम्र रूप से, **सर्वे** = सभी, **मुनयः** = मुनि लोग, **स्तोष्यन्ति** = स्तुति करेंगे ।।५१ ।।

मन्त्र

भीमादेवीति विख्यातं तन्मे नाम भविष्यति ।
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ।।५२ ।।

पदच्छेद

भीमादेवी इति वि-ख्यातम् तत् मे नाम भविष्यति ।
यदा अरुणाख्यः त्रैलोक्ये महा-बाधाम् करिष्यति ।।५२ ।।

अन्वित-पदार्थ

भीमादेवी इति = भीमादेवी के नाम से, **अरुणाख्यः** = अरुण नाम से प्रसिद्ध,

विख्यातम् = प्रसिद्ध,
तत् मे नाम = तब मेरा नाम,
भविष्यति = होगा,
यदा = जब,
त्रैलोक्ये = तीनों लोकों में,
महाबाधाम् = अत्यधिक उत्पात,
करिष्यति = करेगा ।।५२ ।।

मन्त्र

तदाहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम् ।
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ।।५३ ।।

पदच्छेद

तदा अहम् भ्रामरम् रूपम् कृत्वा अ–सम्–ख्येय–षट्–पदम् ।
त्रैलोक्यस्य हितार्थाय वधिष्यामि महा–असुरम् ।।५३ ।।

अन्वित–पदार्थ

तदा अहम् = तब मैं,
असंख्येयम् षट्पदम् = छः पैरोंवाले असंख्य,
भ्रामरम् रूपम् = भ्रमरों के रूप को,
कृत्वा = धारण करके,
त्रैलोक्यस्य = तीनों लोकों के,
हितार्थाय = कल्याण के लिए,
महाऽसुरम् = महा दैत्य का,
वधिष्यामि = वध करूँगी ।।५३ ।।

मन्त्र

भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ।।५४ ।।

पदच्छेद

भ्रामरी इति च माम् लोकाः तदा स्तोष्यन्ति सर्वतः ।।५४ ।।

अन्वित–पदार्थ

तदा = तब लोग,
भ्रामरी इति = भ्रामरी नाम से,
माम् = मेरी,
सर्वतः = सभी,
लोकाः = लोकों में,
स्तोष्यन्ति = स्तुति करेंगे ।।५४ ।।

मन्त्र

इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।
तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम् ।।५५ ।।

पदच्छेद

इत्थम् यदा-यदा बाधाः दानवैः उत्थाः भविष्यति।
तदा तदा अव-तीर्य अहम् करिष्यामि अरि-सम्-क्षयम्।।५५।।

अन्वित-पदार्थ

इत्थम् = इस प्रकार,
यदा-यदा = जब-जब,
दानवैः उत्थाः = दानवों से उत्पन्न,
बाधाः = बाधा,
भविष्यति = होगी,
तदा-तदा = तब-तब,
अहम् = मैं,
अवतीर्य = अवतरित होकर,
अरीणाम् = शत्रुओं का,
संक्षयम् = संहार,
करिष्यामि = करूँगी।।५५।।

।। इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्याः स्तुतिर्नामैकादशोऽध्यायः ।।



।। द्वादशोऽध्याय: ।।

देव्युवाच ।। १ ।।

एभि: स्तवैश्च मां नित्यं स्तोष्यते य: समाहित: ।
तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ।। २ ।।

पदच्छेद

देवी उवाच ।।१ ।।
एभि: स्तवै: च माम् नित्यम् स्तोष्यते य: समाहित: ।
तस्य अहम् स-कलाम् बाधाम् नाशयिष्यामि अ-सम्-शयम् ।।२ ।।

अन्वित-पदार्थ

देवी उवाच = भगवती ने कहा ।।१ ।।
समाहित: च = और एकाग्रचित्त से,
य: = जो,
एभि: = इन,
स्तवै: = शब्दसमूहों के माध्यम से,
नित्यम् = सदा,
माम् = मेरी,
स्तोष्यत = स्तुति करेगा,
तस्य = उसकी,
सकलाम् = सभी,
बाधाम् = बाधाओं को,
अहम् = मैं,
असंशयम् = नि:सन्देह,
नाशयिष्येमि = नष्ट करूँगी ।।२ ।।

मन्त्र

मधुकैटभनाशं च महिषासुरघातनम् ।
कीर्तयिष्यन्ति ये तद्वद् वधं शुम्भनिशुम्भयो: ।।३ ।।

पदच्छेद

मधु-कैटभ (यो:) नाशम् च महिष-असुर (स्य) घातनम् ।
कीर्तयिष्यन्ति ये तत् वत् वधम् शुम्भ-निशुम्भयो: ।।३ ।।

अन्वित-पदार्थ

ये तद्वत् = इसी प्रकार से जो,
मधुकैटभयोः = मधु-कैटभ के,
नाशम् = विनाश,
महिषासुरस्य च = और महिषासुर के,
घातनम् = संहार,
शुम्भनिशुम्भयोः = शुम्भ-निशुम्भ के,
वधम् = वध का,
कीर्तयिष्यन्ति = कीर्तन करेंगे ।।३ ।।

मन्त्र

अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ।
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ।।४ ।।

पदच्छेद

अष्टम्याम् च चतुर्दश्याम् नवम्याम् च एक-चेतसः ।
श्रोष्यन्ति च एव ये भक्त्या मम माहात्म्यम् उत्तमम् ।।४ ।।

अन्वित-पदार्थ

अष्टम्याम् = अष्टमी को,
चतुर्दश्याम् च = और चतुर्दशी को,
नवम्याम् च = तथा नवमी तिथि को,
भक्त्या = भक्ति से,
एकचेतसः चैव = इसी तरह एकाग्रचित्त,
य = जो,
मम = मेरे,
उत्तमम् = सर्वश्रेष्ठ,
माहात्म्यम् = माहात्म्य को,
श्रोष्यन्ति = सुनेंगे ।।४ ।।

मन्त्र

न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चापदः ।
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ।।५ ।।

पदच्छेद

न तेषाम् दुष्-कृतम् किम्-चित् दुष्कृत उत्थाः न च आपदः ।
भविष्यति न दारिद्र्यम् न च एव इष्ट(स्य) वि-योजनम् ।।५ ।।

अन्वित-पदार्थ

तेषाम् = उनको, **किञ्चित्** = कुछ भी, **दुष्कृतम्** = पाप, **न** = नहीं होता, **दुष्कृतात् च** = तथा पाप से, **उत्थाः** = उत्पन्न होनेवाली, **आपदः** = आपत्तियाँ, **न** = नहीं होतीं, **दारिद्र्यम्** = दरिद्रता, **न भविष्यन्ति** = नहीं होंगी, **इष्टस्य चैव** = तथा इच्छित सामग्री का, **वियोजनम्** = वियोग, **न** = नहीं होगा ।।५ ।।

मन्त्र

शत्रुतो न भयं तस्य दस्युतो वा न राजतः ।
न शस्त्रानलतोयौघात्कदाचित्सम्भविष्यति ।।६ ।।

पदच्छेद

शत्रुतः न भयम् तस्य दस्युतः वा न राजतः ।
न शस्त्र-अनल-तोय-ओघात् कदा-चित् सम्-भविष्यति ।।६ ।।

अन्वित-पदार्थ

तस्य = उस भक्त को, **न शत्रुतः** = न शत्रु से, **दस्युतः** = डाकू से, **न वा राजतः** = न तो राजा से, **शस्त्रात्** = शस्त्र से, **अनलात्** = अग्नि से, **तोयौघात्** = बाढ़ से, **कदाचित्** = कभी भी, **भयम् न** = भय नहीं, **सम्भविष्यति** = होगा ।।६ ।।

मन्त्र

तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ।।७ ।।

पदच्छेद

तस्मात् मम एतत् माहात्म्यम् पठितव्यम् सम्-आहितैः ।
श्रोतव्यम् च सदा भक्त्या परम् स्वस्ति-अयनम् महत् ।।७ ।।

अन्वित-पदार्थ

तस्मात् = अत:,
मम = मेरे,
एतत् = इस,
परम = उत्कृष्ट,
स्वस्त्ययनम् = कल्याणकारक,
महत् = महान्,
माहात्म्य = स्तोत्र को,
समाहितैः = एकाग्रचित्त साधन के द्वारा,
भक्त्या = भक्ति से,
सदा = सदा,
पठितव्यम् = पढ़ना चाहिए,
श्रोतव्यम् च = और सुनना चाहिए ।।७ ।।

मन्त्र

उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ।।८ ।।

पदच्छेद

उप-सर्गान् अ-शेषान् तु महा-मारी-सम्-उद्भवान् ।
तथा त्रि-विधम् उत्पातम् माहात्म्यम् शमयेत् मम ।।८ ।।

अन्वित-पदार्थ

महामारी समुद्भवान् तु = संक्रामक रागों से उत्पन्न,
अशेषान् = सम्पूर्ण,
उपसर्गान् = उपद्रव,
तथा = इसी प्रकार,
त्रिविधम् = दैहिक, दैविक, भौतिक तीनों प्रकार के,
उत्पातम् = विध्वंसों को,
मम = मेरा,
माहात्म्यम् = माहात्म्य पठन एवं श्रवण,
शमयेत् = शान्त कर देता है ।।८ ।।

मन्त्र

यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ।
सदा न तद्विमोक्ष्यामि सांनिध्यं तत्र मे स्थितम् ।।९ ।।

पदच्छेद

यत्र-एतत्पठ्यते सम्यङ्नित्यम्-आयतने मम ।
सदा न तद्-विमोक्ष्यामि सांनिध्यं तत्र मे स्थितम् ।।९ ।।

अन्वित-पदार्थ

यत्र मम = मेरे जिस,
आयतन = मन्दिर में,
एतत् = यह महास्तोत्र,
नित्यम् = सर्वदा,
सम्यक् = समुचित रीति से,
पठ्यते = पढ़ा जाता है,
तत्र = वहाँ,
मे = मेरा,
सान्निध्यम् = सामीप्य, निवास,
सदा = सदा,
स्थितम् = स्थिर रहता है,
न तत् = मैं उसे नहीं,
विमोक्ष्यामि = छोड़ूँगी ।।९ ।।

मन्त्र

बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ।
सर्वं ममैतन्माहात्म्यमुच्चार्यं श्राव्यमेव च ।।१० ।।

पदच्छेद

बलिप्रदाने पूजायाम् अग्निकार्ये महा-उत्सवे ।
सर्वम् मम एतत् माहात्म्यम् उच्चार्यम् श्राव्यम् एव च ।।१० ।।

अन्वित-पदार्थ

मम एतत् = मेरे इस,
सर्वम् = सम्पूर्ण,
माहात्म्यम् = माहात्म्य को,
बलिप्रदाने = बलिदान के अवसर पर,
पूजायाम् = पूजा के समय,
अग्निकार्ये = यज्ञ में,
महोत्सव = पुत्रजन्म, विवाहादि उत्सवों में,
उच्चार्यम् = उच्चरित करना चाहिए,
श्राव्यम् एव च = सुनना ही चाहिए ।।१० ।।

मन्त्र

जानताऽजानता वापि बलिपूजां तथा कृताम् ।
प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् ।।११ ।।

पदच्छेद

जानता अ-जानता वा अपि बलि-पूजाम् तथा कृताम् ।
प्रति-ईक्षिष्यामि अहम् प्रीत्या वह्नि-होमम् तथा कृतम् ।।११ ।।

अन्वित-पदार्थ

जानता = विधि का ज्ञान रखनेवालों के द्वारा, **अजानता वापि** = अथवा विधि का ज्ञान न रखनेवालों के द्वारा, **प्रीत्या** = प्रेम वश, **तथा** = वेद्य या अवेद्य प्रकार से, **कृताम्** = की गई, **बलिपूजाम्** = बलिदान युक्त पूजा, **तथा कृतम्** = पूर्वोक्त रीति से किए गए, **वह्निहोमम्** = अग्नियाग प्रधान पूजा को, **अहम्** = मैं, **प्रतीक्षिष्यामि** = ग्रहण करूँगी ।।११ ।।

मन्त्र

शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ।। १२ ।।
सर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ।। १३ ।।

पदच्छेद

शरत्-काले महा-पूजा क्रियते या च वार्षिकी ।
तस्याम् मम एतत् माहात्म्यम् श्रुत्वा भक्ति-सम्-अनु-इतः ।।१२।।
सर्वा-बाधा-वि-निर्-मुक्तः धन-धान्य-सुत-अन्वितः ।
मनुष्यः मत् प्र-सादेन भविष्यति न सम्-शयः ।। १३ ।।

अन्वित-पदार्थ

या च = और जो, **वार्षिकी** = सालाना, **महापूजा** = प्रधान पूजा, **शरत्काले** = शरद ऋतु में, आश्विन माह में, **क्रियते** = की जाती है, **तस्याम्** = उसमें, **भक्तिसमन्वितः** = भक्तिमान्, **मनुष्यः** = मनुष्य, **सर्वाभ्यः बाधाभ्यः** = सभी बाधाओं से, **विनिर्मुक्तः** = पूर्णतः मुक्त होकर, **धनैः धान्यैः** = सम्पत्तियों, **सुतैः** = पुत्रों से,

मम = मेरा,
एतत् = यह,
माहात्म्यम् = माहात्म्य,
श्रुत्वा = सुनकर,
सम् अन्वितः = संयुक्त,
भविष्यति = होगा,
न संशयः = इसमें कोई संशय नहीं है ।।१२-१३ ।।

मन्त्र

श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ।
पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ।।१४ ।।

पदच्छेद

श्रुत्वा मम एतत् माहात्म्यम् तथा च उत्पत्तयः शुभाः ।
पराक्रमम् च युद्धेषु जायते निर्भयः पुमान् ।।१४ ।।

अन्वित-पदार्थ

मम = मेरा,
एतत् = यह,
माहात्म्यम् = माहात्म्य,
तथा च = इसी प्रकार,
शुभाः = कल्याणमयी,
उत्पत्तयः = उत्पत्तियों,
युद्धेषु च = और युद्धों में किये गए,
पराक्रमम् = पराक्रम को,
श्रुत्वा = सुनकर,
पुमान् = मनुष्य,
निर्भयः = भय मुक्त,
जायते = हो जाता है ।।१४ ।।

मन्त्र

रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ।
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ।।१५ ।।

पदच्छेद

रिपवः सम्-क्षयम् यान्ति कल्याणम् च उप-पद्यते ।
नन्दते च कुलम् पुंसाम् माहात्म्यम् मम शृण्वताम् ।।१५ ।।

अन्वित-पदार्थ

मम = मेरा,
माहात्म्यम् = माहात्म्य,
शृण्वताम् = सुननेवाले,
यान्ति = हो जाते हैं,
कल्याणम् च = और मंगल,
उपपद्यते = प्राप्त होता है,

पुंसाम् = मनुष्यों के,
रिपवः = शत्रु,
संक्षयम् = नष्ट,
कुलम् च = तथा परिवार,
नन्दते = प्रसन्न
होता है ।।१५।।

मन्त्र

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ।
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ।।१६ ।।

पदच्छेद

शान्ति कर्मणि सर्वत्र तथा दुः-स्वप्न(स्य) दर्शने ।
ग्रह पीडासु च उग्रासु माहात्म्यम् शृणुयात् मम ।।१६ ।।

अन्वित-पदार्थ

शान्तेः = उत्पातों की शान्ति के,
कर्मणि = यज्ञों से,
तथा = इसी प्रकार,
दुःस्वप्नस्य = अनिष्ट सूचक स्वप्न के,
दर्शने = दिखाई देने पर,
ग्रहाणाम् च = और ग्रहों के कारण,
उग्रासु = प्रचण्ड,
पीडासु = उपद्रव होने पर,
सर्वत्र = सभी जगह,
मम = मेरा,
माहात्म्यम् = माहात्म्य,
शृणुयात् = सुनना चाहिए ।।१६ ।।

मन्त्र

उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ।
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ।।१७ ।।

पदच्छेद

उप-सर्गाः शमम् यान्ति ग्रहपीडाः च दारुणाः ।
दुःस्वप्नम् च नृभिः दृष्टम् सुस्वप्नम् उप-जायते ।।१७ ।।

अन्वित-पदार्थ

उपसर्गाः = प्राकृतिक उत्पात,
दारुणाः च = और कठिन,
ग्रहपीडाः = ग्रह बाधा,
दृष्टम् = देखा गया,
दुःस्वप्नम् = अनिष्ट स्वप्नफल,

शमम् = शान्त,
यान्ति = हो जाती है,
नृभिः = और मनुष्यों द्वारा,
सुस्वप्नम् = कल्याण सूचक स्वप्नफलवाला,
उपजायते = बन जाता है ।।१७।।

मन्त्र

बालग्रहाभिभूतानां बालानां शान्तिकारकम् ।
संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ।।१८।।

पदच्छेद

बाल–ग्रह–अभि–भूतानाम् बालानाम् शान्ति–कारकम् ।
सम्–घात–भेदे च नृणाम् मैत्री–करणम् उत्तमम् ।।१८।।

अन्वित–पदार्थ

बालग्रहेण = पूतना आदि बालहिंसक उपद्रव से,
अभिभूतानाम् = ग्रस्त,
बालानाम् = शिशुओं के रोग को,
शान्तिकारकम् = शान्त करनेवाला,
नृणाम् च = तथा मनुष्यों के,
संघातस्य = संगठन में,
भेद = भेद उत्पन्न होने पर,
उत्तमम् = सर्वश्रेष्ठ,
मैत्रीकरणम् = मैत्री उत्पन्न करता है ।।१८।।

मन्त्र

दुर्वृत्तानामशेषाणां बलहानिकरं परम् ।
रक्षोभूतपिशाचानां पठनादेव नाशनम् ।।१९।।

पदच्छेद

दुर्–वृत्तानाम् अ–शेषाणाम् बल–हानि–करम् परम् ।
रक्षः–भूत–पिशाचानाम् पठनाद् एव नाशनम् ।।१९।।

अन्वित–पदार्थ

पठनात् = पढ़ने मात्र से,
एव = ही यह माहात्म्य,
अशेषाणाम् = सम्पूर्ण,
दुर्वृत्तानाम् = दुष्टों का,
बलहानिकरम् = शक्तिनाशकारक है,
रक्षसाम् = राक्षसों,
भूतानाम् = प्रेतों,

परमम् = परम,
पिशानाम् = पिशाचों का,
नाशनम् = नाशक है ।।१९।।

मन्त्र

सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ।
पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः ।।२०।।
विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ।
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ।।२१।।

पदच्छेद

सर्वम् मम एतत् माहात्म्यम् मम सन्निधि-कारकम् ।
पशु(भिः) पुष्प-अर्घ धूपैः च गन्ध दीपैः तथा उत्तमैः ।।२०।।
विप्राणाम् भोजनैः होमैः प्रोक्षणीयैः अहर्निशम् ।
